श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीन्यासतिलकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीन्यासतिलकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती॥ १॥

प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन्।
हस्तः श्रीरङ्गभर्तुर्माम् अव्यादभयमुद्रितः॥ २॥

अनादेर्निःसीम्नो दुरितजलधेर्यन्निरुपमं
विदुः प्रायश्चित्तं यदुरघुधुरीणाशयविदः।
तदारम्भे तस्या गिरमवदधानेन मनसा
प्रपद्ये तामेकां श्रियमखिलनाथस्य महिषीम्॥ ३॥

महेन्द्राग्नाविष्णुप्रभृतिषु महत्त्वप्रभृतिवत्
प्रपत्तव्ये तत्त्वे परिणमितवैशिष्ट्यविभवाम्।
अधृष्यत्वं धृत्वा कमितुरभिगम्यत्वजननीं
श्रियं शीतापाङ्गामहमशरणो यामि शरणम्॥ ४॥

स्वतःसिद्धः श्रीमानमितगुणभूमा करुणया
विधाय ब्रह्मादीन् वितरति निजादेशमपि यः।
प्रपत्त्या साक्षाद्वा भजनशिरसा वाऽपि सुलभं
मुमुक्षुर्देवेशं तमहमधिगच्छामि शरणम्॥ ५॥

बृन्दानि यः स्ववशयन् व्रजसुन्दरीणां
बृन्दावनान्तरभुवां सुलभो बभूव।
श्रीमानशेषजनसङ्ग्रहणाय शेते
रङ्गे भुजङ्गशयने स महाभुजङ्गः॥ ६॥

www.prapatti.com

रङ्गास्तीर्णभुजङ्गपुङ्गववपुःपर्यङ्कवर्ये गतौ
सर्गस्थित्यवसानकेळिरसिकौ तौ दम्पती नः पती।
नाभीपङ्कजशायिनः श्रुतिसुखैरन्योन्यबद्धस्मितौ
डिम्भस्याम्बुजसम्भवस्य वचनैरोन्तत्सदित्यादिभिः॥ ७॥

घनकरुणारसौघभरितां परितापहरां
नयनमहश्छटां मयि तरङ्गय रङ्गपते।
दुरितहुताशनस्फुरितदुर्दमदुःखमषी-
मलिनितविश्वसौधदुरपह्नववर्णसुधाम्॥ ८॥

दुर्मोचोद्भटकर्मकोटिनिबिडोऽप्यादेशवश्यः कृतः
बाह्यैर्नैव विमोहितोऽस्मि कुदृशां पक्षैर्न विक्षोभितः।
यो माहानसिको महान् यतिपतेर्नीतश्च तत्पौत्रजान्
आचार्यानिति रङ्गधुर्य मयि ते स्वल्पावशिष्टो भरः॥ ९॥

आर्तेष्वाशुफला तदन्यविषयेऽप्युच्छिन्नदेहान्तरा
वह्न्यादेरनपेक्षणात् तनुभृतां सत्यादिवद् व्यापिनी।
श्रीरङ्गेश्वर यावदात्मनियतत्वत्पारतन्त्र्योचिता
त्वय्येव त्वदुपायधीरपिहितस्वोपायभावाऽस्तु मे॥ १०॥

त्वय्याचार्यैर्विनिहितभरास्तावका रङ्गनाथ
त्वत्कैङ्कर्यप्रवणमनसस्त्वद्गुणास्वादमत्ताः।
त्वय्येकस्मिन्नपि विजहतो मुक्तवत् साधनत्वं
त्वच्छेषत्वस्वरसरसिकाः सूरयो मे स्वदन्ताम्॥ ११॥

कल्पस्तोमेऽप्यपास्तत्वदितरगतयोऽशक्तिधीभक्तिभूम्ना
रङ्गेश प्रातिकूल्यक्षरणपरिणमन्निर्विघातानुकूल्याः।
त्रातारं त्वामभेद्याच्छरणवरणतो नाथ निर्विघ्नयन्तः
त्वन्निक्षिप्तात्मरक्षां प्रति रभसजुषः स्वप्रवृत्तिं त्यजन्ति॥ १२॥

त्यक्तोपायव्यपायांस्तदुभयकरणे सत्रपान् सानुतापान्
भूयोऽपि त्वत्प्रपत्त्या प्रशमितकलुषान् हन्त सर्वंसहस्त्वम्।

www.prapatti.com

रङ्गिन् न्यासान्तरङ्गाखिलजनहिततागोचरत्वन्निदेश-
प्रीतिप्राप्तस्ववर्णाश्रमशुभचरितान् पासि धन्याननन्यान्॥ १३ ॥

शोकास्पदांशमथनः श्रयतां भवाब्धौ
रागास्पदांशसहजं न रुणत्सि दुःखम्।
नो चेदमी जगति रङ्गधुरीण भूयः
क्षोदिष्ठभोगरसिकास्तव न स्मरेयुः॥ १४ ॥

हेतुर्वेधे विमर्शे भजनवदितरत् किं त्वनुष्ठानकाले
वेद्यत्वद्रूपभेदो विविध इह स तूपायतान्यानपेक्षा।
रङ्गिन् प्रारब्धभङ्गात् फलमधिकमनावृत्तिरुक्तेष्टिवत् स्यात्
नाना शब्दादिभेदात् प्रपदनभजने सूचिते सूत्रकारैः॥ १५ ॥

भक्तौ रङ्गपते यथा खलु पशुच्छागादिवत्वेदन-
ध्यानोपासनदर्शनादिवचसामिच्छन्त्यभिन्नार्थताम्।
व्यक्त्यैक्याच्छरणागतिप्रपदनत्यागात्मनिक्षेपण-
न्यासाद्येषु तथैव तन्त्रनिपुणैः पर्यायता स्मर्यते॥ १६ ॥

विश्वासायासभूम्नोर्न्यसनभजनयोर्गौरवे को विशेषः
तत्सद्भावेऽपि धर्मान्तर इव घटते कर्तृभेदाद्विकल्पः।
तद्भेदो रङ्गशायिन्ननितरगतितादुत्थशोकातिरेकात्
सद्विद्यादौ विकल्पस्त्वभिमतिभिदया तेन तत्रैकराश्यम्॥ १७ ॥

ध्रुवमधिकृतिभेदात् कर्मवद्रङ्गशायिन्
फलति फलमनेकं त्वत्पदे भक्तिरेका।
शरणवरणवाणी सर्वहेतुस्तथाऽसौ
कृपणभजननिष्ठा बुद्धिदौर्बल्यकाष्ठा॥ १८ ॥

कर्तव्यं सकृदेव हन्त कलुषं सर्वं ततो नश्यति
ब्रह्मेशादिसुदुर्लभं पदमपि प्राप्यं मया द्रागिति।
विश्वासप्रतिबन्धिचिन्तनमिदं पर्यस्यति न्यस्यतां
रङ्गाधीश रमापतित्वसुभगं नारायणत्वं तव॥ १९ ॥



www.prapatti.com

धीकर्मभक्तिरहितस्य कदाऽप्यशक्त्या
    रङ्गेश भावकलुषप्रणतिद्वयोक्तेः।
मन्ये बलं प्रबलदुष्कृतशालिनो मे
    त्वन्मूलदेशिककटाक्षनिपातमाद्यम्॥ २० ॥

अन्धोऽनन्धग्रहणवशगो याति रङ्गेश यद्वत्
    पङ्गुर्नौकाकुहरनिहितो नीयते नाविकेन।
भुङ्क्ते भोगानविदितनृपः सेवकस्यार्भकादिः
    त्वत्सम्प्राप्तौ प्रभवति तथा देशिको मे दयालुः॥ २१ ॥

उक्त्या धनञ्जयविभीषणलक्ष्यया ते
    प्रत्याय्य लक्ष्मणमुनेर्भवता वितीर्णम्।
श्रुत्वा वरं तदनुबन्धमदावलिप्ते
    नित्यं प्रसीद भगवन् मयि रङ्गनाथ॥ २२ ॥

सकृदपि विनतानां सर्वदे सर्वदेहि-
    न्युपनिषदभिधेये भागधेये विधेये।
विरमति न कदाचिन्मोहतो हा हतोऽहं
    विषमविषयचिन्तामेदुरा मे दुराशा॥ २३ ॥

यावज्जीवं जगति नियतं देहयात्रा भवित्री
    त्यक्ताः सर्वे त्रिचतुरदिनग्लानभोगा नभोगाः।
दत्ते रङ्गी निजमपि पदं देशिकादेशकाङ्क्षी
    किं ते चिन्ते परमभिमतं खिद्यसे यत् पुनस्त्वम्॥ २४ ॥

अपि मुहुरपराधैरप्रकम्प्यानुकम्पे
    वहति महति योगक्षेमबृन्दं मुकुन्दे।
मदकलुषमनीषावज्रलेपावलेपान्
    अनुगुणयितुमीहे न प्रभूनप्रभूतान्॥ २५ ॥

मातर्भारति मुञ्च मानुषचटून् हे देह लब्धैरलं
    लुब्धद्वारदुरासिकापरिभवैस्तोषं जुषेथा मनः।

वाचः सीमनि रङ्गधामनि महानन्दोन्नमद्भूमनि
स्वामिन्यात्मनि वेङ्कटेश्वरकवेः स्वेनार्पितोऽयं भरः॥ २६॥

दास्यं लास्यवताऽनुमत्य मनसा रङ्गेश्वर त्वत्पदे
नित्यं किङ्करवाण्यहं न तु पुनः कुर्यां कदर्याश्रयाम्।
मीलच्चक्षुषि वेल्लितभ्रुणि मुहुर्दत्तावमानाक्षरे
भीमे कस्यचिदाढ्यकस्य वदने भिक्षाविलक्षां दृशम्॥ २७॥

त्वय्येकाञ्जलिकिङ्करे तनुभृतां निर्व्याजसर्वंसहे
कल्याणात्मनि रङ्गनाथ कमलाकान्ते मुकुन्दे स्थिते।
स्वामिन् पाहि दयस्व देहि कुशलिन् जीव प्रभो भावये-
त्यालापानवलेपिषु प्रलपितुं जिह्रेति जिह्वा मम॥ २८॥

त्वयि सति रङ्गधुर्य शरणागतकामदुघे
निरुपधिकप्रवाहकरुणापरिणाहवति।
परिमितदेशकालफलदान् फलदाकृतिकान्
कथमधिकुर्महे विधिशिवप्रमुखानमुकान्॥ २९॥

ओमित्यभ्युपगम्य रङ्गनृपतेऽनन्योचितां शेषतां
स्वातन्त्र्यादिमयीमपोह्य महतीमाद्यामविद्यास्थितिम्।
नित्यासङ्ख्यविसीमभूतिगुणयोर्यायामनायासतः
सेवासम्पदमिन्दिरेश युवयोरैकान्तिकात्यन्तिकीम्॥ ३०॥

आचार्याद्रङ्गधुर्य द्वयसमधिगमे लब्धसत्तं तदात्वे
विश्लिष्टाश्लिष्टपूर्वोत्तरदुरितभरं यापितारब्धदेहम्।
नीतं त्वत्कैस्त्वया वा निरवधिकदयोद्भूतबोधादिरूपं
त्वद्भोगैकस्वभोगं दयितमनुचरं त्वत्कृते मां कुरुष्व॥ ३१॥

विधानं रङ्गेशादधिगतवतो वेङ्कटकवेः
स्फुरद्वर्णं वक्त्रे परिकलयतां न्यासतिलकम्।
इहामुत्राप्येष प्रणतजनचिन्तामणिगिरिः
स्वपर्यङ्के सेवां दिशति फणिपर्यङ्करसिकः॥ ३२॥

॥ इति श्रीन्यासतिलकं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com